श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीनिवासरामानुजमहादेशिकैः (मैसूर आण्डवन्)
संस्कृतभाषायां अनुवाद्य अनुगृहीतं
श्रीमद्वेदान्ताचार्यविरचितम्

# ॥ तिरुमन्दिरच्चुरुक्कु ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ तिरुमन्दिरच्चुरुक्कु ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

निर्वेदात् प्रविधावनात् अटयितर्यज्ञानवार्धौ चिरं
मग्नाः! विह्वलिताः उपेत्य रसनोल्लासागमा एकताम्।
एकैव श्रुतिरेकवर्णकलितेवानन्ददात्रादिमे
वर्णे च प्रणवस्य निर्मलमहामण्येकशीलावनम्॥ 1॥

व्यक्तं तात्पर्यमेवं हीत्यनुसन्धाय मानसे।
स्थिरीकुरुत निर्बाधं अकारार्थविमर्शनम्॥ 2॥

आत्मा स्वस्मै स्वतन्त्रस्त्विति विमतमनीषैकनिष्ठाः प्रगाढात्
मोहात् क्रूराघलोकान् अधिवसनपराः! द्योतयन्तीमवर्णम्।
संयोज्यापोह्य सार्थां समवनकृदकारस्य तुर्यां विभक्तिं
शेषत्वं चाभ्युपेता अशिथिलमिह सञ्जीवतात्यन्तपूताः॥ 2॥

त्यक्तोक्ताकारवाच्या व्यपगतविभवा ये विनश्यन्ति भूयः
जायन्ते चेदृशानां प्रणमितशिरसः पादयोः प्रीत्यपेताः।
यातारोऽधश्च मर्त्याः! भगवदितरशेषत्वरिक्ताः उदारान्
वेदार्थान्ध्यायमाना अखिलफलमिदं हीतिराराजते ह॥ 3॥

नित्याश्लिष्टानवद्यौ दिनमणिरिव भा चैकभावौ पती नः
त्यक्त्वा लोकावितारौ कृतपरिचरणा मानवाः! विष्णुमात्रे।

एकीभूतत्रिवर्णात्मकपदगतयोर्वर्णयोस्सारमर्थं
ध्यायं ध्यायं प्रबुद्धाः विमृशत सततं सन्त उज्जीवतेह ॥ 4 ॥

तत्त्वेभ्यष्षड्वतुर्भ्योऽप्यपरमनुपमात् ब्रह्मणोऽन्यं परस्मात्
आत्मानं नावगत्य क्वचिदपि कथमप्यात्तसङ्घातबोधाः।
मर्त्याः ! पिच्छोपमानाः पृथगकृतमकारार्थकं तं प्रदीपं
कृत्वाथात्मीयदास्यं ह्यनुभवत परे पुंसि चामोदयध्वम् ॥ 5 ॥

स्वार्थायत्ताखिलस्वः स्वयमिह सकलाधीश आश्चर्यचर्यः
यौष्माकीणं किलेदं त्विति किमपि न दत्तं च वः पारतन्त्र्यम्।
मध्येमन्त्रं विभिन्नं "नम" इति "मन" इत्येत्य सर्वं मदीयं
स्वाम्यस्मीत्यज्ञतां च व्यपनयत बलैनांसि च ध्वंसयध्वम् ॥ 6 ॥

नित्यानां निखिलात्मनां सुमतिदो भास्वान् सहस्रांशुवत्
दुर्मार्गाद्विनिवारकोऽद्भुतवपुः नित्यस्समस्ताधिपः।
विश्वं न्यस्यति निश्चलं स्वजठरे काले बहिर्न्यस्यति
श्रीशो यश्च विमृश्य संश्रयत तं नारेति शब्दे नराः ! ॥ 7 ॥

शास्त्रीयं वचनं सदोपदिशतामङ्गी गुरूणां दृढौ
नन्तुं वीतनिजान्तरङ्गनयना दुर्मानिनो व्रीडिताः।
गाढध्वान्तचिरोषिताः ! अयनतां प्राप्तोऽखिलानां च यः
यस्यैतेऽयनमीदृशं फलममुं नाथं परं गायत ॥ 8 ॥

सङ्कल्पस्यानुरूपा बहुविधवरिवस्या उपास्याः परस्य
पुंसो विस्मृत्य पञ्चेन्द्रियमरिचरणव्याकुलीभूतमर्त्याः !।
व्याप्येदं यस्समस्तं विधरति परमस्तस्य नारायणेति
प्राह्वे चित्रां दिशन्तीं परिचरणविधिं चाद्रियध्वं विभक्तिम् ॥ 9 ॥

अष्टास्वाशासु येषां सुचरितसुगुणा व्यापृता देशिकैस्तैः
उक्तेष्वस्माकमष्टास्वतनवमिह चार्थान् नवाहं यथावत्।
चित्तारूढानुभूता अभिदधत इवानादिवेदाभिगुप्तं
न्यासं न ब्रूयुरेतान् प्रकटनमनसो वा न दृश्यन्त एव॥ **10**॥

श्रीदेशिकप्रबन्धस्थः "तिरुमन्त्रार्थसङ्ग्रहः"।
गोपालार्येण सश्लोकस्सार्थोऽतन्यत सन्मुदे॥

॥ इति तिरुमन्त्रार्थसङ्ग्रहः समाप्तः॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥